इयम् आकाशवाणी

संस्कृत वार्ता:

दिनाङ्क : 15.06.2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी स्लोवाकिया देशस्य राजधान्यां ब्रातिस्लावा नगर्यां तत्रत्येन प्रधानमन्त्रिणा रॉबर्ट-फिको इत्यनेन सह संवादम् अकरोत्। प्रधानमन्त्री अवोचत् भारत-स्लोवाकिया देशौ व्यापकसहभागितया सम्बन्धान् समुन्नेतुं निर्णयं कृतवन्तौ।
- भारतेन पश्चिम एशियायां प्रचलति संघर्षस्य समाप्तये अमेरिका-इरानयोः सन्धेः स्वागतं कृतम् अस्ति । उक्तं च सन्धेः कार्यान्वयनेन क्षेत्रे शान्तिः स्थिरता च पुनः स्थापिता भविष्यति।
- वित्तमन्त्री निर्मला सीतारामन: अवोचत् यत् देशे खाद्यान्नस्य पर्याप्त-भण्डार: वर्तते। अथ च अल नीनो कारणेन अपि खाद्यान्नस्य नैयून्यं न भविष्यति।
- उत्तरप्रदेशस्य जेवरक्षेत्रे नौएडा अन्ताराष्ट्रिय-विमानस्थानकं वाणिज्यिकरूपेण आरब्धम्। अद्यारभ्य तत्र विमानानां सञ्चालनम् अभवत्।
- ऐषमः फीफा-विश्वचषक-स्पर्धायाम् स्वीडन-देशः अद्य मेक्सिको-देशस्य मोण्टेरे-क्रीडाङ्गणे ट्युनिशिया-देशं पञ्च- एक अङ्कान्तरालेन पराजयत।

अथ वार्ता: विस्तरेण

प्रधानमन्त्री-स्लोवाकिया

प्रधानमन्त्री नरेन्द्रमोदी स्लोवाकिया देशस्य राजधान्यां ब्रातिस्लावा नगर्यां तत्रत्येन प्रधानमन्त्रिणा रॉबर्ट-फिको इत्यनेन सह संवादम् अकरोत्। उपवेशनस्य अनन्तरं संयुक्त-वार्ताहर-सम्मेलने प्रधानमन्त्री नरेन्द्रमोदी अवोचत् भारत-स्लोवाकिया देशौ व्यापकसहभागितया सम्बन्धान् समुन्नेतुं निर्णयं कृतवन्तौ। श्रीमोदी अवोचत् यत् देशद्वयो: रक्षा सहयोगं परस्परविश्वासस्य प्रमाणं वर्तते। देशद्वयेन रक्षाक्षेत्रे सहयोगं समेधितुं अपि सहमतिपत्रं हस्ताक्षरितम्।

पीएम मोदी कॉम्प्रिहेंसिव

प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत् ए.आई. इत्यस्य भविष्यं न केवलं नवोन्मेषे अपितु मानवगरिमा-विश्वासाधिरितमपि भवेत्। श्रीमोदी अवोचत्-यत् प्रौद्योगिकी क्षेत्रे विहित सन्धि: अपि देशद्वयो: मिथ: सहयोगं द्रढयिष्यति।

पीएम मोदी ऑन ए. आई

अत्रावसरे स्लोवाकिया देशस्य प्रधानमन्त्री रॉबर्ट-फिको भारतस्य समेधमानार्थव्यवस्थां प्रौद्योगिक विकासं च प्रतिपादितवान्। तेन संयुक्त राष्ट्र सुरक्षा परिषदि भारतस्य स्थायि प्रतिनिधित्वम् अपि समर्थितम्। अवधेयम् यत् गतशताब्दस्य त्रिनवति-तमाब्दे स्लोवाकिया देशस्य स्वतन्त्रताया: अनन्तरं कस्यापि भारतीय-प्रधानमन्त्रिण: इयं प्रथमा स्लोवाकिया यात्रा वर्तते।

अमेरिका ईरानयोः सङ्घर्षः

भारतेन पश्चिम एशियायां प्रचलति संघर्षस्य समाप्तये अमेरिका-इरानयोः सन्धेः स्वागतं कृतम् । एतेन संघर्षेण विश्वे गम्भीरः आर्थिकसंकटः जातः, अनेकेषु देशेषु

प्राणहानिः च अभवत् । प्रधानमन्त्री नरेन्द्रमोदीः सामाजिकमाध्यमेषु एकस्मिन् संदेशे उक्तवान् यत् भारतस्य आशा अस्ति यत् सन्धेः कार्यान्वयनेन क्षेत्रे शान्तिः स्थिरता च पुनः स्थापिता भविष्यति। अनया व्यापारस्य स्वतन्त्रता सुनिश्चिता भविष्यति।

सीतारामन: खाद्यम्

वित्तमन्त्री निर्मला सीतारामन: अवोचत् यत् देशे खाद्यान्नस्य पर्याप्त-भण्डार: वर्तते। अथ च अल नीनो इति ऊष्णतापस्य दुष्प्रभावेन अपि खाद्यान्नस्य नैयून्यं न भविष्यति। अद्य राजधान्यां नवदिल्ल्यां आयोजिते माइण्डमाइन इति सम्मेलने वित्तमन्त्री अवोचत् यत् खरीफ इति ग्रीष्मर्तौ धान्येभ्य: पर्याप्त-मात्रायां उर्वरकोपलब्धता वर्तते। तयोक्तं यत् ऐषम: प्रावृट् नैयून्यं स्यादिति सम्भाष्यते तथापि अस्माकं पार्श्वे पर्याप्त-भण्डार: विद्यते।

विराम

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

आयुषमन्त्रालयः योगः

आयुष-मन्त्रालयेन अद्य नव-दिल्ल्यां द्वादशः अन्ताराष्ट्रिय-योग-दिवसस्य भव्यायोजनाय औपचारिक-कार्यक्रमाणां शुभारम्भो विहितः। आयुषमन्त्री प्रतापराव-जाधवः राजधान्यां नवदिल्ल्यां अवोचत् यत् मुख्य-कार्यक्रमः प्रधानमन्त्रिणः नरेन्द्र-मोदिनः नेतृत्वे कोलकातायां भविष्यति। अमुना उक्तं यत् अत्रावसरे

पञ्चचत्वारिंशत् निमेषात्मकं योग-सत्रम् आयोजयिष्यते। मुख्य-कार्यक्रमेण सह हुगली नद्यां पञ्चशतं नौकासु  योगसत्रायोजनस्य योजना वर्तते।

प्रतापराव जाधव- योग .. सै.

आयुष-मन्त्री अवदत् यत् अन्तराष्ट्रिय-योगदिवसस्य मुख्य-समारोहात् पूर्वं गतदिते विशेष-योग-कार्यक्रमस्य साक्षात् प्रसारेण योग-सत्रे चतुर्लक्षाधिकजनैः प्रतिभागं विधाय गिनीज वर्ल्ड रिकॉर्ड इति विश्वकीर्तिमानं संरचितम्। अवधेयं यत् अस्मिन् वर्षे अन्ताराष्ट्रिय-योगदिवसस्य विषयः "स्वस्थ-जीवनाय योगः " वर्तते।

जी-7 सम्मेलनम्

फ्रांस-देशस्य एवियन इति नगरं अद्य रात्रौ आरभमाणस्य द्विपञ्चाशत-तमस्य जी-7 सम्मेलनस्य आतिथ्यं कर्तुं सज्जम् अस्ति। अमेरिका-इरान्-देशयोः सप्ताधिकैक-शतं दिवसीययुद्धस्य समाप्तये सन्धे: निर्धारणेन एषा सभा महत्त्वपूर्णेन सकारात्मकेन विकासेन सह अवलोक्यते । फ्रांसदेशस्य राष्ट्रपतिः इमैनुएल मैक्रोन् जी-७ देशानाम् नेतॄणाम् औपचारिकरूपेण स्वागतं करिष्यति। भारतं, ब्राजील, दक्षिणकोरिया, केन्या, मिस्रदेशः च सहभागित्वेन शिखरसम्मेलने आमन्त्रिताः सन्ति । प्रधानमन्त्री नरेन्द्रमोदी शिखरसम्मेलने भागं ग्रहीतुं श्वः एवियननगरम् यास्यति।

जेवर-विमानपत्तनम्

उत्तरप्रदेशस्य जेवरक्षेत्रे नौएडा अन्ताराष्ट्रिय-विमानस्थानकं वाणिज्यिकरूपेण आरब्धम्। अद्यारभ्य तत्र विमानानां सञ्चालनम् अभवत्। एतत् हि देशस्य

नागर-विमाननक्षेत्रे महत्त्वपूर्णं सोपानं निर्दिशति। उद्घाटनसमारोहं सम्बोधयन् केन्द्रीय-नागर-विमानन-मन्त्री के. राममोहन-नायडुः अवदत् यत्, विमानस्थानकस्य प्रथम-चरणे प्रतिवर्षं एक-दशमलव-द्वि कोटि-यात्रिणां यात्रानुमानं वर्तते, अनन्तरं प्रतिवर्षं सप्त कोट्यधिकयात्रिणां यात्रानुमानं भविष्यति। सः अवदत् यत् एतत् विमानस्थानकं राष्ट्रिय सेवायाः आन्ताराष्ट्रिय-विमानसेवायाः च परिचालनस्य केन्द्ररूपेण कार्यं करिष्यति। विमानस्थानकस्य कृते स्वभूमिं दत्तवतां सप्तत्यधिकैकशतं कृषकाणां समूहः, जेवर-क्षेत्रस्य विधायकस्य धीरेन्द्रसिंहस्य नेतृत्वे अन्यैः च साकं जेवर-विमानस्थानकात् लखनऊ-नगरं प्रति प्रथम-वाणिज्यिक-विमाने यात्रां कृतवन्तः।

<u>ऋतु विभाग:</u>

ऋतु विज्ञान विभागेन देशस्य पूर्वोत्तर भागे उपहिमालयीय क्षेत्रे पश्चिम बङ्गाले च श्व: यावत् प्रबलवृष्टे: अनुमानं प्रकटितम्। ऋतुविज्ञानविभागेन राजस्थाने पूर्वीय-उत्तर प्रदेशे ओडिशायां मध्यप्रदेशे च झञ्झावातस्य नारङ्गवर्णीया सञ्चेतना प्रसारिता। अपि च उक्तं यत् दक्षिण-पश्चिम प्रावृट् प्रभावाय स्थिति: अनुकूला वर्तते।

<u>फीफा- विश्वचषकस्पर्धा</u>

ऐषमः फीफा-विश्वचषक-स्पर्धायाम् स्वीडन-देशः अद्य मेक्सिको-देशस्य मोण्टेरे-क्रीडाङ्गणे स्वस्य ग्रूप-एफ-क्रीडायां ट्युनिशिया-देशं पञ्च- एक अङ्कान्तरालेन पराजयत। स्वीडन्-देशः द्वितीयार्धे प्रबलं प्रदर्शनं कृत्वा विश्वसनीयं विजयं प्राप्नोत्। अनेन विजयेन स्वीडन्-देशः स्वस्य अभियानस्य प्रबलं आरम्भम् अकरोत्।

।। इति वार्ता: ।।